# पाठ-१३
# वर्षर्तु वर्णनम्

**सारान्शः**

बलाकाभिः सुशोभिताः जलधराः पर्वतशिखरेषु विश्रामं कुर्वन्तः प्रतीयन्ते । जनाः भ्रमरैः सद्दशं कृष्णवर्णं रसयुक्तं जम्बुफलं यथेष्टं खादन्ति । पवनवेगेन अनेकवर्णानि विपक्वानि आम्रफलानि भूमौ पतन्ति । अस्मिन् ऋतौ प्रकृत्यां सर्वत्र सौन्दर्यं द्दश्यते किन्तु वियोगिनां कृते अयम् ऋतुः अतीव दुःखदायी वर्तते ।वर्षर्तौ मेघैः आच्छादिते गगने तारागणस्य सूर्यस्य च दर्शनं न भवति । अन्धकारे च दिशः स्पष्टाः न भवन्ति मेघानां गर्जनं श्रुत्वा चिरकालात् सुप्ताः मण्डूकाः जागृताः भवन्ति नवधाराभिः आहताः प्रसन्नाः भवन्ति । नदीनां कूलाः प्रवर्धन्ते मार्गाः च परिवर्तिताः भवन्ति।अभिषेकात्परं यथा राजानः स्वस्य राज्यस्य प्रगतिं शक्तिम् ऐश्वर्यं प्रदर्शयन्ति तथैव मेघैः अभिषिक्ताः पर्वतेन्द्राः स्वं रूपं श्रियं च दर्शयन्ति । वनेषु क्वचित् भ्रमराः गायन्ति, क्वचित् मयूराः नृत्यन्ति कुत्रचित् च गजेन्द्राः मदमत्ताः भूत्वा विचरन्ति । इत्थं एते वनप्रान्ताः अनेकेषां भावानाम् आश्रयाः भूत्वा शोभन्ते विविधवर्णाः पिपासिताः विहंगाः आकाशात् पतितं पत्रेषु संलग्न जलं प्रसन्नतया पिबन्ति।

**मुख्य बिन्दवः**

**काव्यपरिचय:** आदिकवेः वाल्मीकेः रामायणम् भारतस्य आदिकाव्यम् । धार्मिकनैतिकमर्यादानां तु अयं कोशः एव वर्तते । भारतस्य प्राचीनयुगस्य परम्पराणां, धारणानाम्, आदर्शानां च अस्मिन् महाकाव्ये विशदं वर्णनं विद्यते । ग्रन्थस्य नायकः मर्यादापुरुषोत्तमः श्री रामः अस्ति । आधुनिककालेऽपि तस्य चरित्रम् अनुकरणीयं मन्यते। रामायणम् एकम् उपजीव्यं काव्यम्। अनेकेषां महाकाव्यानां नाटकानां च मूलस्रोतः रामायणम् एव अस्ति। आधुनिकसाहित्यम् अपि अनेन ग्रन्थेन अनुप्राणितम् । विश्वस्य अनेकासु भाषासु अस्य अनुवादः जातः ।

**अवगच्छामः**

कविपरिचयः महर्षिः वाल्मीकिः एव आदिकविः कथ्यते । सः तपस्वी साधकः, वेदानां ज्ञाता, सामाजिकप्रथानां मान्यतानां च संस्थापकः, धर्मस्य स्तम्भः, लोकानुरंजनस्य समर्थकः आसीत्।

**आवश्यकोऽयं ज्ञानम्**

आदिकविना वाल्मीकिना विरचितं महाकाव्यं रामायणं अस्ति। अस्मिन् ग्रन्थे श्रीरामस्य कथा वर्णिता । श्रीरामः अयोध्यायाः नृपस्य दशरथस्य ज्येष्ठः पुत्रः आसीत् । पितुः आज्ञया सः लक्ष्मणेन सीतया च सह वनम् अगच्छत् । वने श्रीरामस्य पत्नीं सीतां रावणः अहरत् । सीतायाः वियोगे श्रीरामः लक्ष्मणः च ताम् अन्वेष्टुं वने इतस्ततः अभ्रमताम् । तयोः भ्रमतोः वर्षा ऋतुः प्रारभत। उद्विग्नः श्रीरामः वर्षायाः वर्णनं लक्ष्मणं प्रति करोति ।

**व्याकरण बिन्दवः शब्द भण्डाराश्च**
**शतृशानच प्रत्ययौ**

लटः शतृशानचौ। हिन्दीभाषायां 'कार्य करते हुए' इति अर्थे शतृशानच्प्रत्यययोः प्रयोगः क्रियते। परस्मैपदिधातुभिः सह शतृप्रत्ययस्य प्रयोगः भवति आत्मनेपदिधातुभिः च सह शानच्.प्रत्ययस्य प्रयोगः भवति । शतृशानच्प्रत्ययान्तपदानां प्रयोगः विशेषणरूपेण भवति। अतः विशेषणस्य लिंगविभक्तिवचनानि विशेष्यपदानुसारं भवन्ति।

**बहुव्रीहिसमासः**- अन्यपदप्रधानो बहुव्रीहिः

**शब्दार्थाः**

1. वारिधराः = बादल
2. विश्रम्य = विश्राम करके
3. नदन्ति= चिंघाड़ रहे हैं
4. प्लवंगा: = बन्दर
5. नवजलौघैः = नई जलराशि से
6. प्लवगाः = मेंढक
7. वारणेन्द्रैः = गजराजों से
8. वनान्ताः = वनप्रान्त
9. पत्रपुटेषु = पत्तों के दोनों में

**योग्यतां वर्धयत**

तृषाकुलैश्चातकपक्षिणां कुलैः
प्रयाचितास्तोयभरावलम्बिनः ।
प्रयान्ति मन्दं बहुधारवर्षिणो
बलाहकाः श्रोत्रमनोहरस्वनाः ।।

प्रवृत्तनृत्यं कुलमद्य बर्हिणाम्।

मुदित इव कदम्बैर्जातपुष्पैः समन्तात्
पवनचलितशाखैः शिखिभिर्नृत्यतीव ।
हसितमिव विधत्ते सूचिभिः केतकीनां
नवसलिलाभिषेकच्छिन्नतापो वनान्ताः ।।

प्रहर्षिताः केतकिपुष्पगन्ध
माघ्राय मत्ता वननिझरिषु।
प्रपातशब्दाकुलिता गजेन्द्राः

सार्धं मयूरैः समदा नदन्ति ।।

**पाठ संप्रेष्यः**

- वर्षर्तौ धरणी तृप्ता जायते ।
- प्रकृत्यां सर्वत्र प्रसन्नता दृश्यते मण्डूकाः नदन्ति, भ्रमराः गायन्ति, मयूराः नृत्यन्ति, गजाः च मत्ताः भवन्ति ।प्रकृतेः सौन्दर्यम् अद्भुतम् भवति।
- क्त- क्तवतु प्रत्यययोः प्रयोगः भूतकालार्थे क्रियते। विशेषणरूपेण अपि अनयोः प्रयोगः भवति ।
- क्त- क्तवतुप्रत्ययान्तशब्दानां रूपाणि त्रिषु लिंगेषु विभक्तिषु च विशेष्यानुसारं भवन्ति ।
- शतृ प्रत्ययस्य प्रयोगः परस्मैपदिधातुषु शानच् प्रत्ययस्य च प्रयोगः आत्मनेपदि धातुषु क्रियते ।
- बहुव्रीहिसमासे अन्यपदं प्रधानं भवति।
- नृत् पा धातुद्वयस्य रूपाणि ।

**अधिकाङ्क्षानाम् अर्जनं कथं भवेत् ।**

- पाठस्य सम्यक् रूपेण अध्ययनं कृत्वा भावम् अवगच्छेत।
- पाठे आगतानां कठिन शब्दानां व्याकरणात्मक स्वरूपं जानीयात् ।
- अधिकाधिक अध्याये संदर्भित विषयाणां अध्ययनं कर्तव्यम्।

**स्व मूल्याङ्कनम् कुरुत**

- अध्यायस्य भावं स्व शब्दैः वर्णयत ।
- अध्याये आगतानां व्याकरण बिन्दुनां अभ्यासं कुरुत।
- मूल पाठस्य सस्वर अभ्यासं कुरुत।